The Kshetrajna - Paramatman identity

This identity between the observer consciousness and the Supreme Brahman is the seminal teaching of the Upanishads, Brahma sutras and Bhagavadgita. We find a very pithy verse in the Mahabharata on this theme:

It occurs in the Shanti Parvan, Chapter 188, shloka 23:

https://sa.wikiquote.org/s/f2

आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः।
तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः॥ शान्ति.१८७/२३॥

It is noteworthy that this verse is included in the 'Mahabharata-suuktayah', select verses of the Mahabhrata having special significance.

The verse means: Atma is said to be the Kshetrajna, knower-of-the observed world. He is the kshetrajna, endowed with the body-mind-organs complex, attributed with the guNa-s of the Prakriti. These make him think that he is kartaa, bhoktaa, samsaari, sukhi, duhkhi, etc. However, this is not the truth. When the discrimination between the Prakriti-guNas and the Atman is accomplished based on the Vedantic methods, the kshetrajna himself is realized to be the Supreme Self, Brahman.

Here are a few statements of Shankara Bhagavatpada on the idea of kshetrajna-Brahman identity:

क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसि इत्यर्थः ॥ ३५ ॥ Bh.Gita Bhashyam 4.35

हे भारत, यस्मात् क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरम् अन्यत् अवशिष्टम् अस्ति, तस्मात् क्षेत्रक्षेत्रज्ञयोः ज्ञेयभूतयोः यत् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते, तत् ज्ञानं सम्यग्ज्ञानम् इति मतम् अभिप्रायः मम ईश्वरस्य विष्णोः ॥ Bh.Gita Bhashyam 13.2

क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनम् 'यज्ज्ञात्वामृतमश्नुते' (भ. गी. १३ । १२) इत्युक्तम् , तत् कस्मात् हेतोरिति, तद्धेतुप्रदर्शनार्थं श्लोकः आरभ्यते —

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥ [ibid 13.26]

न तु समानधर्मता साधर्म्यम् , क्षेत्रज्ञेश्वरयोः भेदानभ्युपगमात् गीताशास्त्रे । Bh.Gita Bhashyam 14.2

Given below is the image of the Mahabharata verse along with the commentary of Nilakantha: (See in the page below)

पञ्चात्मके पञ्चरतौ पञ्चविज्ञानचेतने ।
शरीरे प्राणिनां जीवं वेत्तुमिच्छामि यादृशम्
मांसशोणितसंघाते मेदः स्नाय्वस्थिसंचये ।
भिद्यमाने शरीरे तु जीवो नैवोपलभ्यते ॥ १३
यद्यजीवं शरीरं तु पञ्चभूतसमन्वितम् ।
शारीरे मानसे दुःखे कस्तां वेदयते रुजम् १४
श्रृणोति कथितं जीवः
कर्णाभ्यां न श्रृणोति तत् ।
महर्षे मनसि व्यग्रे
तस्माज्जीवो निरर्थकः ॥ १५
सर्वं पश्यति यद्दृश्यं मनोयुक्तेन चक्षुषा ।
मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति ॥
न पश्यति न चाघ्राति न श्रृणोति न भाषते ।
न च स्पर्शरसौ वेत्ति निद्रावशगतः पुनः १७
हृष्यति क्रुध्यते कोऽत्र शोचत्युद्विजते च कः
इच्छति ध्यायति द्वेष्टि वाचमीरयते च कः ॥
भृगुरुवाच ।
न पञ्चसाधारणमत्र किञ्चि-
च्छरीरमेको वहतेऽन्तरात्मा ।
स वेत्ति गन्धांश्च रसान् श्रुतीश्च
स्पर्शं च रूपं च गुणांश्च येऽन्ये ॥ १९
पञ्चात्मके पञ्चगुणप्रदर्शी
स सर्वगात्रानुगतोऽन्तरात्मा ।
स वेत्ति दुःखानि सुखानि चात्र
तद्विप्रयोगात्तु न वेत्ति देहः ॥ २०
यदा न रूपं न स्पर्शो नोष्मभावश्च पावके ।
तदा शान्ते शरीराग्नौ देहत्यागेन नश्यति ॥
आपोमयमिदं सर्वमापो मूर्तिः शरीरिणाम् ।
तत्रात्मा मानसो ब्रह्मा सर्वभूतेषु लोककृत् ॥
आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः ।
तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः ॥ २३
आत्मानं तं विजानीहि सर्वलोकहितात्मकम्
तस्मिन् यः संश्रितो देहे ह्यब्बिन्दुरिव पुष्करे
क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकम्
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान्
सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम् ।
अतः परं क्षेत्रविदो वदन्ति
प्रावर्तयद्यो भुवनानि सप्त ॥ २६

**पञ्चेति** । पञ्चभूतात्मके पञ्चविषयरतौ पञ्चविज्ञानानि ज्ञानकारणानि पञ्च चेतनानि ज्ञानानि च यत्र तस्मिन्पञ्चविज्ञानचेतने ॥ १२ ॥ नैवोपलभ्यते व्रीहितंण्डुलवत् ॥ १३ ॥ अजीवं चेतनाशून्यम् । अन्यस्याभावाच्छरीरमेव चेतनमित्यर्थः ॥ १४ ॥ मास्तु देहेन्द्रियसंघातश्चेतनो यस्मिन्व्यग्रे सति सङ्घातः सन्निकृष्टोऽपि शब्दादीन्न गृह्णाति तन्मन एव आत्माऽस्त्वित्याह चतुर्भिः-**श्रृणोतीति** ॥१५॥ उत्तरमाह-**न पञ्चेति** । यथा श्रोत्रादीनां शब्दादिग्राहकत्वेन ग्राह्यसजातीयगुणाश्रयत्वेन आकाशादिरूपत्वम् । एवं मनोऽपि सर्वगुणग्राहकत्वात् सर्वगुणाश्रयत्वेन पाञ्चभौतिकम् । अतस्तन्न किंचिद्भूतेभ्योऽन्यत्तत्त्वान्तरं पाञ्चसाधारणत्वात् । अतस्तन्न शरीरनिर्वाहकं किं तु एकः अन्तरात्मैव शरीरं स्थूलसूक्ष्मभेदेन द्विविधं वहते चालयति ॥ १९ ॥ यदुक्तं मनसोऽनवधानान्न श्रृणोति तत्राह—**पञ्चात्मके इति**। पञ्चभूतात्मके शरीरे पञ्चगुणाः यस्मिन् तत् तथा मनस्तस्य द्रष्टा । मम मनः खिन्नमित्यनुभवात् । स एव मनोद्वारा सर्वगात्रानुगतः । व्यतिरेकमाह—तद्विप्रयोगात्सुषुप्तौ समाधौ वा देहः सबुद्धिमनस्को न वेत्ति । देहादेश्चेतनत्वे सुप्त्यादावपि वेदनमपरिहार्यं स्यात् । ततश्चक्षुष इव मनसाऽप्यनुन्मीलनाददर्शनेऽपि न तस्य करणत्वव्याहतिरित्यर्थः ॥ २० ॥ यदा निर्वातप्रदीप इव देहाग्नौ शान्ते रूपादिकं नोपलभ्यते तदा नश्यति म्रियते देह एव न तु चेतन इत्यर्थः ॥ २१ ॥ स्थूलदेहनाशमुक्त्वा सूक्ष्मस्याविनाशमाह—**आप इति** । आपोमयं अम्बुमयम् । अत्रापशब्देन सूक्ष्मभूतसङ्घातो गृह्यते । तन्मयं सूत्रात्मना व्याप्तमित्यर्थः । तस्माद्देहिनामपि आप एव मूर्तिराकृतिः । तत्राप्सु आत्मा चिद्रूपः पुरुषः मानसः तदन्तर्गते मनसि अभिव्यक्तः । स एवोपाधियोगाज्जीवः । स एव ब्रह्मा पूर्वोक्तश्चतुर्मुखो मुख्यजीवः । सार्वज्ञ्यादिमत्त्वात् ॥ २२ ॥ स एवात्मा प्राकृतैः त्रिगुणात्मकमूलप्रकृतेर्विकारैर्गुणैरिन्द्रियमनोभिः संयुक्तः सन् क्षेत्रज्ञः जीव इत्युच्यते । तथा च श्रुतिः—'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति । अयमेव परमात्मेत्याह—**तैरेवेति** ॥२३॥ तं परमं सर्वलोकस्य हितं सुखं तदात्मकं 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। तस्मिन्पूर्वोक्तस्थूलसूक्ष्मरूपे॥२४॥ क्षेत्रज्ञं प्रत्यगात्मानं त्वमर्थं तं परमात्मानं तदर्थं जानीहि । क्षेत्रज्ञस्य लौकिकस्वरूपमाह-**तम इति** । योऽयमावरणप्रवृत्तिप्रकाशाद्यभिमानी क्षेत्रज्ञः स परमात्मैवेत्यर्थः ॥ २५ ॥ सचेतनं चेतनेन सहितं जीवगुणं जीवस्य भोगोपकरणं देहेन्द्रियमनांसि स जीवगुणः । चेष्टते तं च सर्वं सर्वो-